CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

# विराट्वर्णनम्

टेकनाथ अधिकारी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

# विराटवर्णनम्

(लघुकाव्यम्)

टेकनाथ अधिकारी

प्रकाशकः
पूर्वाञ्चल साहित्य प्रतिष्ठान
विराटनगर (नेपाल)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुस्तकम् : विराटवर्णनम्
रचयिता : टेकनाथ अधिकारी
प्रकाशकः : पूर्वाञ्चल साहित्य प्रतिष्ठान, विराटनगर
प्रकाशनम् : २०६६ वैशाखोवैक्रमः
सर्वाधिकारः : डिल्लीराम अधिकारी
मुद्रण संख्या : पञ्चशतीः
मूल्यम् : विंशतीः
मुद्रकः : एभरेष्ट ग्राफिक्स प्रिन्टर्स, विराटनगर
टंककः : कृष्ण चौधरी, सुभद्रा पोखरेल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

# आशंसनम्

**प्रा. टीकाप्रसाद शर्मा**

वाग्देवतासमुपासकानां संख्यावतामग्रणीनां कवि–पण्डित –टेकनाथअधिकारिमहोदयानां निवेदनमञ्जरी-(१९९८) जीवनवृत्ताऽ(२०६०)न्तर्नाद(२०६४) कृतिपरम्परायां, तुर्यमप्यतुर्यं, प्रकाशोन्मुखं "विराटवर्णनम्"नाम नवनवं कविकर्म समाययौ नयनातिथित्वमस्माकम्।

अत्र खलु नयपालस्यास्माकं राष्ट्रस्य शिरोमुकुटस्य नगाधिराजस्य हिमालयस्य स्वर्णाऽ - रुण ा- तमोरि - प्रभृति - सप्त-कौशिकीनां- दुहितृर्ण "त्रिवेणी"ति शोभन नाम्नःसुसङ्गमस्थलात्सुमनसां मनोनयनाऽऽ नन्दकरात्पार्वत्यप्रदेशात्समुद्भूता, भुवनपावनी, तिष्यकल्मषनाशिनी, चिरन्तनसंस्कारसंस्कृत्युभयकूलकल्लोलिनी नवनवाऽभिरामा, काव्य– तरङ्गिणी वराहक्षेत्र–चतरा–रुद्राक्षारण्य –शीताचल–धरान–इटहरी–दुहवी–सोनापुर–प्रभृतिक्षेत्र- तीर्थ– मन्दिर–पुर–पत्तन–खर्वटोच्चावचनिकरेषु विचरन्ती राष्ट्रस्यास्य विराटनगरं नाम रत्नाकरं समासाद्याऽऽसेचनकमभिषिच्य चाऽमुमत्रैव परां निर्वृतिं समासादयति।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीं सप्ताऽशीतितमे वसन्ते विहरतामेतेषां स्थविरतराणां महानुभावानां किलैषा काव्य-धुनी सहृदयानामास्थावतां विबुधानामवश्यमेव प्रमोदं जनयिष्यतीति मन्यामहे।

काव्यस्यास्यानुपदमेव साधारणजनानां कृते विहितं लोकभाषायां रूपान्तरणमित्यहो खल्वेतेषां विश्वजनीना सुदृष्टिः।

वाग्देवतावरिवस्यायां सुसमर्पितजीवनानामेतेषां कविधौरेयाणां वयं सुस्वास्थ्यसमन्वितमायुष्यं हि निकामं कामयामहे॥ शुभम्॥

२०६५।१२।२१ सन्मार्ग सदनम्
श्रीरामनवमी धरान १६



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

# भवतां टेकनाथानां लेखनी चलिता भवेत्

विद्वद्वरष्टेकनाथः शास्त्रोपाधि- विभूषितः
विराटवर्णनं सम्यक् रचयामास साम्प्रतम्

कियत्पूर्वमसौ विद्वान्नुष्टुपछन्दसायुतम्
प्रिया-वियोगजं काव्यमार्त्तनादं लिलेख ह

विराटस्तुतिव्याजेन तीर्थस्थाना दिवर्णनम्
कृतमत्र मया दृष्ट लिखितं देवभाषया

कृतिरेषा भविष्याणा मितिहास पुरःसरम्
सर्वेषामेव भविता सदा सन्मार्ग दर्शकः

वयोवृद्धकवेरेषा कृतिर्विस्फुरताच्चिरम्
शतायुष्यं प्रदातारो भवेयुः सर्वदेवताः

पञ्चपल्लव संयुक्ताः स्नेहात् संप्रेषिता मया
विलसन्तु दिवारात्रौ मदीयाः शुभकामनाः

*शुभेच्छुकः*

**बालसन्त मोहनशरण देवाचार्य**

प्राचीनहरिद्वार, चतराधाम, सुनसरीः(नेपाल)



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

# काव्यं भवेत् सुललितं सरलं सुपाठ्यम्

**- सोमराज अभय**

टेकनाथ गुरुवर्य त्वया तु संस्कृतं समवलम्व्य, अभाषि
तत्तुसुन्दरतरंबहुरम्यम् खण्डकाव्यमधुना निरमायि

संक्षिप्तविधिना विद्वन् विराटनगरीर-स्थितान्
सर्वान् जनपदान् धन्यान् परिवेशपुरःसरान्

कृतौ विशेषे ह्येकस्मिन् यत्वया रचितं गुरोः
आदर्शमिव मे भाति कृपणाः खलु जन्तवः

देवस्थलानि कति सन्तिस्वमातृभूम्याम्
प्राग्वाग्मतीपरिसरादिति तार्किकाणाम्
तेषां कृते तु भवता श्रम इत्यकारि
धन्यस्त्वमेव गुरुवर्य, वय च धन्याः

स्वदेशभाषामवलम्व्य संस्कृतं
भक्तैः सदा संग्रहणीयपुस्तकम्
सेव्यं भवेत् सर्वजनस्य सन्ततं
काव्यं भवेत् सुललितं सरलंसुपाठ्यम्



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

खण्डकाव्यमिदं देशे एकमेव प्रकाशते
तवकीर्तिध्वजं मन्ये ह्यनुष्टुप्छन्दसा गिरा

संक्षेपेण विराट्पुर्या वर्णन-व्याज–भाषितैः
नदीनां नाम–ग्रहणैः पुण्यस्थलस्थ–मन्दिरैः

नेपालभूमिं सम्पूर्णामपि किञ्चिन्निदर्शयन्
वीरब्रतधरोवृद्धो बलवान् कवि रित्ययम्

*विराटनगर*



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

# कविर्विराटनगरं तीर्थरूपेण पश्यति

- जानकी वल्लभ दाहालोपाध्याय

अधिकियन्ते कर्माणि श्रुत्युक्तानि सदा यतः ।
अधिकारीति विख्यातो विप्रो वेदविदुत्तमः ॥

टेकनाथाभिधः शास्त्री सर्वेषां हितचिन्तकः।
विभिन्नोपाधिसंयुक्तः प्रसिद्धोजनसंसदि ॥

तेनाऽधुना विरचितं काव्यं संस्कृत–भाषया ।
काष्ठमण्डपमारभ्य विराटपुर वर्णनम् ॥

कृतेरस्या मयाचात्र कृतं सिंहावलोकनम् ।
उपयुक्त–मिदं मत्वा प्रशंसा विहिता मया ॥

स्वदेशे ऽ स्मिन् प्रसिद्धस्य विराटनगरस्य च ।
महिमा वर्णिता तेनाऽनुष्टुप् छन्दसि संस्कृते ॥

काष्ठमण्डपमारभ्य कौशिकीतटसन्निधौ ।
पिण्डेश्वर वराहादिवर्णनं च समासतः॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रविश्य नगरे चत्र स्वास्थ्य–शिक्षा–पुरः–सरम् ।
विभिन्न देवदेवीनां मठमन्दिर वर्णनम् ॥

विपन्नानां शिशूनां च स्थविराणां गवामपि ।
रक्षार्थं तत्परा भक्ता ग्रन्थेऽस्मिन् वर्णिता मुहुः ॥

भगवद्भक्तियुक्तस्य वयोवृद्धस्य लेखनी ।
भूयान्नित्यं स्वदेशस्य समुन्नतिविलेखने ॥

*विराटनगर ६, चाँदनीचौक*



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

# कवेःकराङ्कितं काव्यं चिरञ्जयतु संस्कृते

- रोहिणी प्रसाद खनाल

नेपालराष्ट्रेपूर्वेऽस्मिन् धन्कुटामण्डलान्तरे
चानुवानामग्रामोऽस्ति सुब्राह्मणनिवासकः

तस्मिन् जनपदे चैकोऽधिकारीत्युपनामक :
लक्ष्मीकान्तःपिता यस्य वत्सला जननी स्मृता

तयोर्हि टेकनाथोऽसौ पुत्ररत्नमजीजनत्
स एव वैष्णवो नाम रामप्रपन्नभाक् द्विजः

वराहक्षेत्रधामाद्वै विराटनगरावधि
तीर्थानियानि सन्तीह देवानां मन्दिराणि च

लिलेख स कविःशास्त्री नालिखत् विपणादिकम्
कवेर्देहश्च जीर्णेव लेखनी तरुणायते

विराटस्थो विराटस्य चक्रे "संक्षिप्तवर्णनम्"
साहित्याब्धौ हीदंकाव्यं सरसि कमलं यथा

काव्यविद् सुकविर्धन्यो धन्यैव लेखनी तव
कवेःकराङ्कितं काव्यं चिरञ्जयतु संस्कृते

*विराटनगर-१, पोखरीया*



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

# किञ्चन प्रास्ताविकम्

- टेकनाथ अधिकारी

अयि सुधियः, अखिल-ब्रह्माण्डाधिपतेर्भगवतः श्रीमन्नारायणस्य निरतिशयकृपया,१९७९ वैक्रमवत्सरस्य माधवे मासि,पूर्वीय-नेपालस्य धनकुटा-मण्डलान्तर्गते चानुवा-नाम्नि ग्रामे,अरुणानदीनिकटे,काश्यप-कुल–भूषणयोःपण्डित-लक्ष्मीकान्त-वत्सलादेवी-अधिकारीत्यभिधयोः पित्रोरहं सञ्जातोऽभव चतुर्थः पुत्रष्टेकनाथः। शैशवकालादेव यावज्जीवं सदाऽचारसम्पन्नस्य जनकस्य सस्नेह-सौशील्यशालिन्या जनन्याश्च प्रेरणया शिक्षा-दीक्षादिकं समासाद्य कियतैव कालेन "पण्डित"पद भाजनोऽभवम् । ततश्च नचिरेणैब यथाविधि वैवाहिकेन संस्कारेण द्वितीयमाश्रमं प्रविष्टः तदनु "चरैवेति चरैवेति" इत्यादि-वैदिकानुशासनप्रेरितो विद्याकामो देशाटनाय निर्गतः। दिङ्गला-मुगा-काश्यादिषु परिभ्रमन्,आसामप्रदेशान्तः पातिनि शोणितपुराऽऽख्ये मण्डले सम्प्राप्तः । तस्मिंश्च तत्र तत्र शिक्षा-संस्कार-धर्म-सदाचरणादिकं जनतासु प्रवितरन्, यथाऽवसरमध्ययनञ्च विदधानः-तत्प्रान्तीय-प्राच्यविद्याऽधिकृत-विविधविषयकोपाधिपरीक्षासु च सुसाफल्यमधिगतवान्। एतावता च तडिच्चपलः प्रायेण द्वादशवर्षात्मकः कालो विनिर्गतः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनन्तरञ्च अकारणकरुणा-वरुणाऽऽलयया भगवत्या मातृभूम्या प्रगाढस्नेहेन स्नेहवत्या बलवदाकारितोहमुत्सृज्य तत्रत्यमैश्वर्यं प्रतिष्ठाञ्च झटित्येवात्र प्रत्यागतः। अत्र किल वैराटीये नगरे क्वापि विद्यालये विद्यादानकर्म्मण्यानिवृत्यवकाशं, प्रायेण पञ्चत्रिंशद्वर्षात्मकः कालो भगवत्या वाग्देवतायाः सेवायां विश्राणित अस्मिनामाधुना सन्निवृत्तः।

राष्ट्रस्य विविधासु सेवासु सन्ति त्रयोऽपि मम सूनवः स्व-स्व- गार्हस्थ्य-निगमे निष्णाता दुहित्र्यश्च तिस्रः स्पृहणीयाः सुशोभनाः चास्ते तदनु प्रसूता मम सन्तान-कल्पबल्लरी। इत्थञ्चाद्य पश्चिमे वयसि सुमुखमेवासमहम्।

परं अवश्यं भाविभावानां विनिवारणे कः खलु क्षमः। विगते २०६३ तमे वत्सरे कार्तिकशुक्लनवम्यां निखिलमपि रोग-प्रतिकार-विधानं विफलयन्ती, सार्द्धषड्दशकवर्षपूर्वतश्च्छायेव सहचारिणी मम जीवनं - सहचरी,शिवकुमारी,एकपदे प्रविहाय मां दिव्यमव्ययं तद्धाम प्रस्थितवती। जानन्नपि संयोगो विप्रयोगान्त इति जडीकृतोऽभवमहमात्यन्तिकेन तेन वियोगेन। तदा पुनर्ममान्तःस्फुरन्त्या देवतया भगवत्या कवितयाऽभिप्रेरितो राष्ट्रभाषायां विरचय्य लघु-लघुकं,वेदनामयं काव्यं "अन्तर्नाद" तःजातोऽहं यत् किञ्चिदाश्वस्तः।

इदानीं च "यया जन्मभूम्या सस्नेहमाकारितः परदेशतः प्रत्यागतः यस्याङ्केस्थित्वा जीवनमनवद्येन लोकोपकृतिपरेण विद्यादान-कर्म्मणा,त्वयाऽतिवाहितं तदस्यापि विराटनगरस्य प्रब्रूहि



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भो परिचयमिति तयैवान्तर्हृदि विराजमानया मम वाग्देव्याऽभिप्रेरितः संस्कृतभाषया प्रस्तुतोऽस्म्यत्र स्थविरोऽहं सप्ताशीतिवर्षदेशीयः। विस्मृता कौमुदी सर्वा काव्येनास्ति बहुज्ञता मम तथाऽपि प्रवृत्तोऽस्म्यत्र। अत्र च प्रथमं राष्ट्रदेवं तत्र भवन्तं पशुपतिनाथं प्रणम्य त्रिवेणी संगम-सप्तकौशिकी-वराहक्षेत्र-चतरा-दन्तकाली-पिण्डेश्वर-प्रभृति-धार्मिकक्षेत्र-समन्वितस्य विराटनगरस्य,सरिन्मठमन्दिरशिक्षास्वास्थ्यसाहित्यकलोद्योगैतिह्यादिनैक विषयेषु, प्रकाश-स्पर्शनेन नामनिदर्शनमात्रेण चाऽपि मन्दं मन्दं किमपि विहितं काव्य-केलि-कौतुकं, एतेनाऽपि सामान्येन मतकर्म्मणा सचेतसां विद्वज्जनानां सज्जनानामन्येषां च स्तोकमपि यदि जायेत मनोविनोदनं तर्हि हन्तस्तोकमपि संसिद्धं नाम विराडाराधनपरं मत्प्रयोजनंम्। पुनश्च संस्कृतेतरपाठकानामास्वादनसौविध्यं मनसि निधाय राष्ट्रभाषयां द्यायारूपेण प्रविहितं रूपान्तरणम्। साकमेव चोभे प्रकाश्यमेस्यत इति च विनिवेदयामि।

काव्ययोरनयोः पाण्डुलिप्यवलोकनादिपुरस्सरं ससंमति यथाशीघ्रं, प्रकाशनस्य कृते समभिप्रेरयन्तं ममातीव हितैषिणं पियानुजवरं-प्राध्यापक-टीकाप्रसादशर्म्माणं हृदयेनाऽभिनन्दाभि। पुनश्चेदं पद्यात्मक लघुकाव्यमवलोक्य सुरभारतीगिरा शुभकामना प्रदातारोविद्वांसः सहृदयमभिवन्दनीया मम। एवमेवानयोः काव्ययोःप्रकाशनप्रकरणे मम पुत्राणां, पुत्रीणां च सर्वेषामेव प्रशंसनीयास्ति भूमिका तेष्वपि सर्वेषामग्रजस्य



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

डिल्लीरामस्य विशेष विशिष्टःसहयोगः, तत्राऽपि नित्य - नियमित-सक्रियतायां सामग्री सम्पादनमुद्रणं संशोधनतच्छुल्कनिर्वर्त्तनादिष्वखिलकर्मसु कनीयस आयुष्मतः गोकुलस्यास्ति पुरस्सरस्त्वम् । अथ च सर्वानेवैतान्, शुभाशीर्वादवचनैरनिशमभिनन्दयामि

शुभम् !

*विराटनगर ३, गोग्राहा*



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

# प्रकाशकीय

संस्कृत भाषा एउटा प्राचीन भाषा हो। जुन भाषाको तुलना अन्य भाषासँग हुन सक्दैन। संस्कृत भाषामा एउटा बेग्लै मिठास छ। संस्कृत भाषा एउटा बीज हो। भाषिक सृष्टिमा जसको योगदान अतुलनीय छ। जसको प्रभाव अन्य भाषामा पनि छ। एउटा शिष्ट र शालीन भाषाका रूपमा यस भाषालाई लिइन्छ। यस भाषाका रस अन्य भाषामा सिञ्चन हुने गरेको छ। जसको सुस्वाद अन्य भाषाहरूले लिइरहेका छन्। हाम्रो संस्कृति संस्कार जसमा यही भाषाको प्रभाव छ र पनि अहिले संस्कृत भाषा निरिह भाषाका रूपमा रहेको छ हाम्रो देशमा।

हाम्रो देशले संस्कृत विषयका धेरै विद्वान विदूषी पाएको छ। जसले नेपाली भाषा-साहित्यको क्षेत्रमा विशिष्ठ योगदान दिएका छन्। संस्कृत भाषाको इतिहास हेर्दा यो भाषा समृद्ध छ। नेपाली साहित्यको जग मानिन्छ यो भाषा। तर अहिले संस्कृत भाषाका पुस्तकहरू कमै प्रकाशित हुनेगरेका छन्। हामी यस भाषालाई एउटा कठिन अर्थात् अप्ठ्यारो भाषाका रूपमा लिन्छौं। विशेष गरेर अहिले यो भाषालाई एक



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जाति विशेषको भाषाका रूपमा हेर्ने र लिने गरिएको छ। यो एउटा सङ्कीर्ण सोच हो। जुनसुकै भाषा होस्- भाषा सर्वव्यापी हुन्छ। जसको व्यापकता आकाशजत्तिकै फराकिलो हुन्छ। जसलाई सङ्कीर्ण मनको कसीले मापन गर्न सकिन्न। भाषिक ज्ञान बौद्धिक ज्ञान हो, जसले मानवचेतना परिष्कृत गर्छ।

अहिले हामीमाझ संस्कृत भाषा ओझेलमा परेको छ। यही ओझेलमा परेको संस्कृत् भाषालाई साहित्य सिर्जनाको माध्यम बनाएर कवि टेकनाथ अधिकारीले एउटा कृति सिर्जना गर्नुभएको छ जुन कृति हो-**विराटवर्णनम्**। जसमा एउटा पुरानो इतिहास बोकेको गोग्राहा अहिले आएर विराटनगर भएको इतिहास छ। यस विराटनगरभित्र के के छन्? यसको प्राचीन इतिहास कस्तो छ? ती समग्र यथार्थहरूलाई संस्कृत भाषामा लेख्नुभएको छ कविले, काव्यात्मकरूपमा। जहाँ विराटनगरको धार्मिक, सामाजिक, आर्थिक, शैक्षिक सम्पूर्ण कुराहरूलाई समेट्नु भएको छ। विराटनगरका विगतदेखि वर्तमानसम्मका संक्षिप्त दस्तावेजका रुपमा लिन सकिन्छ यो कृतिलाई। विराटनगरको हिजो र आज जान्न चाहनेलाई यो कृतिले निश्चय नै सघाउ पुऱ्याउने छ भन्ने लागेको छ हामीलाई।

पाका कवि अधिकारी संस्कृत भाषाका विद्वान हुनुहुन्छ। उमेरको ८८ औं खुड्किलो उक्लिसक्नुभएका कविभित्र अझै सिर्जनशील उत्साह छ। उहाँलाई एउटा



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रेरणाका रूपमा लिन सकिन्छ। शैक्षिक क्षेत्रमा दीर्घ लगानी गर्नुभएका उहाँको साहित्यतर्फ पनि उत्तिकै योगदान र लगाव छ। सिर्जनालाई उमेरले छेक्दैन यस भनाइलाई यस कृतिले पुष्टि गरेको छ। १९ वर्षको उमेरमा निवेदन मञ्जरी नामक कृतिबाट साहित्यिक यात्रा प्रारम्भ गर्नुभएका कवि अधिकारीले ९० वर्षको उमेर पुग्न लाग्दा आफ्नै विराटनगरलाई सम्झेर यो कृति ल्याउनु भएको छ।

**विराटवर्णनम्** नेपाली भाषामा प्रकाशित कविकृति **विराटमहिमा** को संस्कृत रूप हो। जुनजुन कुराहरू कविले **विराटमहिमामा** लेख्नुभएको छ तीनै कुरा छन् संस्कृतमा लेखिएको यो ग्रन्थ **विराटवर्णनम्** मा। मात्र भाषा फरक छ, भाव र अनुभूति उही। संस्कृतप्रेमीहरूलाई निश्चय नै यो कृतिले सन्तुष्टि दिनेछ भन्ने हामीलाई लागेको छ।

कृति प्रकाशनको अवसर दिनुभएकोमा कवि टेकनाथ अधिकारीप्रति आभारी छौं र निरन्तर उहाँको दीर्घायु र साहित्यिक सफलताको कामना गर्दछौं।

**विवश पोखरेल**
अध्यक्ष
पूर्वाञ्चल साहित्य प्रतिष्ठान
विराटनगर



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

# विराटवर्णनम्

वाग्मत्यास्तटवर्तिनं पशुपतिं नत्वा च गुह्येश्वरीम्
शालिग्रामदगण्डकी - परिसरे श्रीमुक्तिनारायणम्।
आशैलात्प्रवहन्त्यनेकसरित : श्रीकौशिकायास्तटे
स्मृत्वात्रादिवराहरूपमनिशं नारायणं संश्रये ॥

कर्णाली- अरुणा त्रिशूलि कमला-मेचीमहाकालिका:
मर्स्याङ्दी विमला तमोर-वरुणा-नारायणी गण्डकी।
एता: स्वच्छजला महानद - नदीरज्ञानसंशान्तये
स्मारं स्मारमहर्निशं किमपियत्प्रस्तूयते साम्प्रतम् ॥

आर्यावर्तान्तरे देशे नेपाले स्थायिनो वयम्।
सर्वेऽपि धर्मरक्षार्थं संलग्नाःस्मो निरन्तरम्॥

अस्माकं जन्मभूरेषा वनपर्वतसंयुता ।
वनस्पतिलतायुक्ता सुरम्या शस्यश्यामला॥

वटाश्वत्थशमीविल्वकदलीमालतीयुता ।
रुद्राक्षागस्ततुलसीत्यादिवृक्षै: सुशोभिता॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राजधानी प्रसिद्धास्ति काष्ठमण्डपनामतः ।
रक्षार्थं वाग्मतीतीरे साक्षात् पशुपतिः स्थितः ॥

काष्ठमण्डपपूर्वस्यां त्रिवेणीतीर्थमुत्तमम् ।
श्रीकौशिकीमहानद्याः समुत्पत्तिस्थलं महत् ॥

स्वर्णाऽऽरुणा तमोरिश्च मिलिता यत्र विश्रुताः ।
ख्यातं त्रिवेणी तत्तीर्थं तस्या दर्शन- दुर्लभम् ॥

प्रयागस्य त्रिवेण्यां तु लुप्तप्राया सरस्वती ।
स्वर्णाऽऽरुणा तमोरिश्च प्रत्यक्षमिह सन्ति ताः ॥

अतोऽत्र दुर्लभं तीर्थमित्युक्तिर्नाधिका भवेत् ।
प्रामाण्यं हिमवत्खण्डेः पुराणैः प्रतिपादितम् ॥

प्रादुर्भूता ततश्चैव कौशिकाख्या महानदी ।
यस्यास्तीरे वराहस्य विष्णोर्दर्शनमुत्तमम् ॥

ततश्चोच्चगिरिश्रृङ्गे तीर्थं श्रीविष्णुपादुका ।
यत्र श्राद्धादिकार्येण तृप्यन्ति पितरः सदा ॥

पर्वतान्निःसृतास्तत्र जलधारास्तु नैकश : ।
नीत्वा सोमसुता"कोका"कौशिकीमनुधावति ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्थं पर्वतमार्गेण प्रवहन्ती समागता ।
कौशिकी"चतरा"स्थाने दृश्यते विस्तृताधुना ॥

पुरा सिद्धोऽभवत् कश्चित् साधकः"औलिया"ऽभिधः ।
आस्तेऽद्यापि तपोभूमौ औलियामठ - मन्दिरम् ॥

अस्मिन् परिसरेऽरण्ये यत्र कुत्र दिवौकसाम् ।
मन्दिराणि च दृश्यन्ते कौशिकीतटसन्निधौ ॥

कस्यचिद् द्विजपुत्रस्य सत्प्रयासेन तत्स्थलम् ।
लेभे श्लाध्यां प्रसिद्धिं वै साम्प्रतं जनसंसदि ॥

लुप्तप्रायस्थलस्यास्य शास्त्रप्रामाण्यपूर्वकम् ।
महत्वपूर्णतीर्थस्य विकासमकरोदयम् ॥

नैतावान्मात्रं कौशिक्याः पिण्डेश्वर-वराहयो :।
कुम्भोत्सवविधानेन दर्शयामास सन्निधिम् ॥

प्राचीनेऽत्र हरेर्द्वारे द्वादशाब्दस्तदर्द्धकः ।
पूर्णार्धश्चैव प्रारम्भःश्लाध्यः कुम्भ महोत्सवः ॥

प्रवेशद्वार मारभ्य कुम्भस्तम्भ : शिवालयौ ।
विधेते यज्ञशाला च तथान्वत् कीर्तनस्थलम् ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निर्माण-पथ-मारूढं विद्यते भव्य-मन्दिरम् ।
नचिराद् यत्र भविता श्रीराधा-कृष्ण-दर्शनम् ॥

अनाथालय-गोशाले धर्मशाला तथैव च।
विद्यालयश्च तत्रास्ति संस्कृतोत्थानहेतवे ॥

स "वालसन्तः" "चतराधाम्न" स्तत्रत्यसम्पदः।
भूत्यै भूयाच्चिरायालं सद्भक्तास्युःसहायकाः ॥

पुराकाले तपस्तप्तुमत्रा ऽऽ गत्य महर्षयः।
प्रापुः सिद्धिं कथाः सन्ति पुराणेषु सुविस्तृताः ॥

आख्यानानि च दृश्यन्ते, इतिहासपुराणयोः।
हिमाद्रिखण्डे निर्दिष्टा कौशिक्या महती कथा ॥

कियद्दूरे पूर्वदिशि महाभारत - पर्वतः।
क्रोडे विजयपूरस्ति यत्राऽऽस्तेदन्तकालिका ॥

रुद्राक्षारण्यदेशोऽयं यस्याधिष्ठातृदेवता ।
राजतेऽत्र महादेवःपिण्डेश्वर इति स्मृतः ॥

क्षीराब्धि-मथनाज्जातं सुधासारं सुधीवराः ।
स्थापयामासुरत्रैव श्रीपिण्डेश्वरसंज्ञया ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हित्वा कैलाशभवनमृद्धं हैमवतीश्वरी ।
राजते निकटेदेवी "दन्तकाली"हरप्रिया ॥

सर्वसम्पत्समायुक्ता विद्वद्वर्गैः समन्विता ।
धरान - नगरी चात्र वर्तते सुमनोहरा ॥

गीतावक्ता कर्मयोगी श्रीकृष्णः पार्थसारथिः ।
श्रीगीता-भवनेऽत्रैव राजते विश्ववन्दितः ॥

पञ्चकन्या बुढासुब्बा तथान्ये देवदेवताः ।
धराननगरे सन्ति नगरो देवतामयः ॥

सदाचारयुतैर्भक्तैःप्रायशो हरिकीर्तनम् ।
गीताभवनमागत्य क्रियते हरिवासरे ॥

बांझागरा-नामकेऽपि स्थाने भक्तै स्तु नागरैः ।
सञ्चाल्यते मनोहारि चाऽखण्डं हरिकीर्त्तनम् ॥

धरानतः समारभ्य विराटनगरान्तरे ।
मध्ये"इटहरी"नाम्नी चास्ते नगरपालिका ॥

चतुष्पथमयी "रथ्या" शोभते चत्वरान्विता ।
कार्यालयाश्च सन्त्यत्र देशोन्नत्यै इतस्ततः ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिवालयेन सहितं श्रीराधा-कृष्ण-मन्दिरम् ।
अत्रास्ते दर्शनं भक्ताःकुर्वन्ति हरिकीर्तनम् ॥

अस्मिन्निटहरी स्थाने चतुर्दिक्षु निरन्तरम् ।
यान-वाहन संचारो लभ्यते जनसङ्कुलः ॥

ततः सोनापुरस्थाने राधाकृष्णस्य मन्दिरम् ।
तत्रोत्सव-विवाहादि-कार्याणि संभवन्त्यपि ॥

जन्माष्टम्यां पर्वकाले श्रीहरेः कीर्तनं वरम् ।
दर्शनार्थे सदैवात्र समागच्छन्ति सज्जनाः ॥

मन्दिरान्तरकार्याणां, पर्वणां परिचालने ।
समीपवर्तिभिर्भक्तै विहिताऽस्ति सहायता ॥

किंचिद् दूरेऽस्ति "दुहवी" प्रसिद्धोमार्गमध्यगः ।
हनुमत्प्रमुखा देवाः सन्त्यत्र मन्दिरादिषु ॥

दुहवीदक्षिणे काचित् वहते निर्मला नदी ।
वृद्धगंगेति भाषन्ते इतिहासविदो जनाः ॥

हट्टकं भौमवारे तु लगत्यत्र सुविस्तृतम् ।
नद्या निकटमस्यास्तु सन्त्युद्योगगृहाणि च ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तद्दक्षिणे कियद्दूरं विद्यते वंशवाटिका ।
सन्ति भक्ता भक्तिमन्त आस्ते मारुति-मन्दिरम् ॥

विद्यतेऽन्यत्पुनस्तत्र श्रीसीताराम -मन्दिरम्
मार्गस्योभयतो भक्त जनानामाश्रमाणि च

ततोऽग्रे "टंकि" नामाख्ये ग्रामे तत्र निवासिभिः ।
श्रद्धया निर्मितं दिव्यं श्रीराधाकृष्ण-मन्दिरम् ॥

कथाप्रवचनं तत्र पर्वकाले महोत्सवाः ।
प्रस्तूयन्तेहरेर्भक्तैः प्रत्यहं हरिकीर्तनम् ॥

प्रायेणाऽत्र विष्णुभक्ताः सदाचारयुता द्विजाः ।
सन्ति सद्भावसंयुक्ता गृहस्थाश्रमवासिनः ॥

अग्रे विराजते रम्यं विराटनगरं पुरम् ।
व्यापारोद्योगसत्-शिक्षा-स्वास्थ्य-सम्पद्-विभूषितम् ॥

विभिन्नानां निकायानां सुरक्षायां दिने दिने ।
मार्गसंशोधनार्थे च भ्रमन्ति कर्मचारिणः ॥

विराटनगरे रम्ये विराटस्य निकेतने ।
बहूनि सन्ति रम्याणि मन्दिराणि समन्ततः ॥

मार्गस्योभयपार्श्वे च वसन्ति विबुधाः जनाः ।
विभिन्न-जनजातीनां भवनानि समन्ततः ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्ति काञ्चन-पथे शिव-सद्म
कञ्चनेश्वर शिवोऽत्र दयालुः ।
वायुयानपथि चोच्चतराणि
सन्ति भव्य-भवनानि शुभानि ॥

कञ्चनेश्वरसान्निध्ये विद्यते पुस्तकालयः ।
वेदान्तधर्मशास्त्राणां ग्रन्थानां संग्रहालयः ॥

भवनाभ्यन्तरे तत्र देवमन्दिरसन्निधौ ।
कथा कीर्तनसत्सङ्गाः प्रभवन्ति दिने दिने ॥

नगरस्य तु वायव्ये व्योमयानस्थलं महत् ।
उड्डीयन्ते विमानानि प्रत्यहं तु क्षणे क्षणे ॥

क्वचित् कार्यविशेषेण त्वरितं गमनाय च ।
अन्ताराष्ट्रिययानानि सुलभानि दिनेदिने ॥

अच्युताऽऽख्ये मिले चाऽत्र पूर्वकालेतु नैकशः ।
यागादीनि तु जातानि,यत्रास्ते विष्णु-मन्दिरम् ॥

वायुयानस्थलात्तत्र पूर्वस्थे दिव्य-मन्दिरे ।
ददाति दर्शनं भक्तान् देवी श्रीविन्ध्यवासिनी ॥

परितः सन्ति तत्रापि हरिभक्तियुता जनाः ।
कथाकीर्तनसत्संगः प्रायस्तत्रापि प्रत्यहम् ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रैव वै संस्कृत-पाठनाय
विद्यालयाःसन्ति चतुष्पथेषु ।
चत्वारि दिव्यानि च मन्दिराणि
सहैव सन्त्यत्र मनोहराणि ।।

पुरस्य पूर्वोत्तर - मध्यभागे
विलोक्यते कञ्चनवाटिका या ।
लक्ष्मीपतेर्मन्दिरमस्ति तत्र
सुशोभते संस्कृत-पाठशाला ॥

श्रद्धाभक्तियुतानां च भक्तानां भवनानिच ।
सन्त्यत्र परितो नित्यं श्रूयते हरिकीर्तनम् ॥

तद् दक्षिणे वै "वटवृक्ष" नाम्नि
स्थाने च राधारमणाख्यदेवः ।
विराजते संस्कृतपाठशाला
अत्रापि नित्यं प्रपठन्ति छात्राः ॥

श्रीराममन्दिरं दिव्यं राधारमण-सन्निधौ ।
सीतालक्ष्मणसंयुक्तं तयोर्मध्ये सदाशिवः ॥

अष्टादशपुराणानां वेदोपनिषदां तथा ।
अन्येषां धर्मशास्त्राणामस्त्यत्र संग्रहालयः॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतिथीनां निवासाय सुलभायान्यकर्मणाम्।
विशाला धर्मशाला च वरीवर्ति सुशोभना॥

वेदव्याकरणादीनामध्यापनक्रमेण हि ।
छात्रवृत्तिभुजश्छात्राः पठन्तीह निरन्तरम्॥

विवाहादिककार्येषु सामग्रीणां च सञ्चयः।
अस्त्यत्र सुलभं सर्वं मन्यन्ते पुरवासिनः॥

किंचित् तद्दक्षिणे स्थानं रम्यं हरिहरात्मकम्।
हरिशङ्करयोर्यत्रं युगपद् दर्शनं शुभम् ॥

विद्यालयो धर्मशालाद्वैतसंस्था च वर्तत ।
पाणिनिपाठशालायां पठन्ति द्विजबालकाः॥

कियद्दूरे ततश्चाऽपि स्थाने पाञ्चालिसंज्ञके।
लक्ष्मीनारायणः साक्षात् मन्दिरान्तर्विराजते॥

गोशाला धर्मशालाऽत्र पाठशाला च वर्तते।
अतिथीनां निवासाय सन्ति वास-गृहाणि च॥

सौविध्य-सहिते चाऽत्र स्थित्वाऽऽचार्याऽनुशासने।
सदाचारयुता नित्यं पठन्ति द्विजबालकाः ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महोत्सवा भविष्यन्ति नित्यं पर्वणि पर्वणि ।
वैष्णवा भगवद्भक्ता स्तदीयाऽऽराधनेरताः ॥

द्वापरान्ते कलेरादौ पाण्डवानां विवासने ।
विराटनगरे तेषां गुप्तवासोऽभवत्पुरा ॥

भिन्न - नामानि सम्पाद्य बिराटस्य निकेतने ।
सहैवासीत् द्रौपदी च सैरन्ध्री नामधारिणी ॥

विराटनृपतेर्गावो दुष्टै : कौरवबन्धुभिः ।
सर्वास्त्वपहृता यत्र तद् गोग्राहमिदं स्थलम् ॥

यत्राऽरण्ये भीमसेनो हत्वा "कीचक"मुद्धतम् ।
ररक्ष द्रौपदीं तस्माद् भीतान् जनपदानपि ॥

पुरातनेतिहासानां कृते सिंहावलोकने ।
ज्ञायते यत्रकुत्रापि पाण्डवानां पराक्रमम् ॥

विराट-नृपप्रासादाः कदम्बारण्यवाटिकाः ।
भग्नावशिष्टा दृश्यन्ते इदानीमपि सर्वतः ॥

विराट - भूपतेर्नाम्ना विराटेश्वर-शंकरः ।
स्थापितः पूजितोऽत्रास्ति सर्वैर्नगरवासिभिः ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्समीपे पुनस्तत्र लक्ष्मीनारायणस्य च ।
मन्दिरं वर्तते रम्यं दर्शनीयं मनोहरम् ॥

तद्दक्षिणे कियद्दूरे सत्यनारायणस्य च ।
दिव्यमन्दिरमासाद्य दर्शनं क्रियते जनै : ॥

अतिथीनां निवासाय, तथान्योत्सवकर्मणि ।
विशाला धर्मशाला च विद्यतेऽत्र मनोरमा ।।

धर्मशाला-मन्दिरयोःसञ्चालन-क्रिया-शुभाः ।
तन्मन्दिरसमीपस्थैः श्रद्धालुभिर्विधीयते ॥

तन्मदिरात् कियत् प्रत्यक्, शनैश्चर-ग्रहस्य च ।
मन्दिरं वर्तते तत्र कृष्णरङ्गेण रञ्जितम् ॥

दशाग्रह - प्रशान्त्यर्थं सर्वे नगर - वासिनः ।
शनैश्चर-दिने गत्वा नित्यं कुर्वन्ति दर्शनम् ॥

तस्यापि पूर्वतः किंचित्कालिकायास्तु मन्दिरम् ।
धर्मशालादिभिर्युक्तं दर्शनीयं मनोहरम् ॥

सिंहवाहन-संयुक्ता देवी दशभुजा शुभा ।
लक्ष्मी-सरस्वती-युक्ता राजतेऽत्र महेश्वरी ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः किञ्चिद् दक्षिणे तु पञ्चास्यस्य हनूमतः ।
आस्ते मन्दिरमागत्य जनाः कुर्वन्ति दर्शनम् ॥

हनुमन्मन्दिरात् पूर्वं श्रीरामो जानकीपतिः ।
सीतालक्ष्मणसंयुक्त आस्ते मारुतिसेवितः ॥

रामभक्तजनाः प्रायः समवेता दिनेदिने ।
श्रीरामचरितं भक्त्या शृण्वन्ति, कीर्तयन्ति च ॥

अत्राऽपि धर्मशालास्ति कथाप्रवचनस्थलम् ।
महोत्सवा भविष्यन्ति पुण्यपर्वणिपर्वणि ॥

रोगाणां च विनाशाय स्वास्थ्य-संरक्षणाय च ।
विद्यते च विशालोऽत्र चिकित्सालय उत्तमः ॥

शल्यक्रियासु निपुणा विशेषज्ञा भिषग्-वराः ।
विक्रेतारश्चौषधीनां सर्वे सन्ति विचक्षणाः ॥

नगरस्य तु पूर्वस्यामौषधालय - सन्निधौ ।
शिवालयो "वनस्खण्डी" प्रसिद्धोऽस्ति पुरातनः ॥

वनस्खण्डी नामधेयोः योगी संसिद्धपूरुषः ।
शिवालयं स्थापितवान् लोकानां हितकाम्यया ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वनस्खण्डीनिर्मितस्य पश्चान्नगरवासिभिः ।
शिवालयस्य विहिता पुनर्निर्माणिकी क्रिया ॥

ततोऽपिपूर्व- दिग्भागे गीतामन्दिरमास्थितम् ।
कृष्णस्य राधिकायाश्च भक्ताः कुर्वन्ति दर्शनम् ॥

अतिमनाहरमन्दिरमास्थितम्
मधुरमोहनरूपसमन्वितम् ।
इह हि राधिकया सह संस्थितं
प्रमुदिताः प्रणमन्ति ब्रजेश्वरम् ॥

एतद्दक्षिणपार्श्वे तु "मधुमारा"ऽभिधे स्थले ।
"बाँके विहारी"-श्रीकृष्णो राजते दिव्यमन्दिरे ॥

तन्मन्दिरस्य परितो वैष्णवा निवसन्ति च ।
प्रायशः प्रत्यहं तत्र श्रूयते हरिकीर्तनम् ॥

ततोऽपि दक्षिणे व्यासमन्दिरं खलु सुन्दरम् ।
इदं प्रवचनस्थानं सत्संगार्थं प्रयुज्यते ॥

ततश्च पश्चिमे किंचिद् नवनिर्मित-मन्दिरे ।
लभ्यतेऽष्टचिरञ्जीविदेवानां दिव्यदर्शनम् ॥


Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बालानां बालिकानां च कुमाराणां तथैव च।
संस्कारो वेदविधिना कर्तव्य श्चेति चिन्तया॥

संस्कारभवनं चैकं संस्थापनस्थलं महत्।
निर्माणाऽरम्भमधुना स्थानेऽस्मिन्नेव वर्तते॥

ततः पश्चिमदिङ्मार्गे वृक्षच्छायासमन्विते।
मन्दिरे श्रीजगन्माता वर्तते बगलामुखी॥

विराटनगरस्यात्र पूर्वस्यां सिङ्गिया नदी।
स्वच्छवारियुता हृद्या वहत्यत्र निरन्तरम्॥

ऋष्यशृङ्गादिमुनयो यत्र पर्वतसानुनि।
तेपुस्तपश्च तत्रत्यः पर्वतीयजलोद्गमः॥

वहन् समतले प्राप्तो नदीरूपेण पावनः।
नाम्ना नदी सिङ्गियेति सुप्रसिद्धा जनश्रुतिः॥

श्रीसिंगियानामसरित्समीपे
सरस्वतीमन्दिरमस्ति दिव्यम्।
तत्रत्यगार्हस्थ्यजना वदन्ति
"सरस्वतीटोलनिवासिनोऽवयम्"॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्राऽऽस्ते श्रीजगन्माता विद्यादेवी सरस्वती।
नित्यं विद्यार्थिवर्गाणां हृदयाब्जप्रकाशिनी ॥

गायत्री पाठशालाऽत्र पुरस्कृत्य तु संस्कृतम्।
अध्यापयति,सोत्साहं पठन्ति बालबालिकाः ॥

अथ शुभोत्तर-पूर्व-नदीतटे
निवसते बजरङ्गबली कपिः।
वहति सा सरिता च मनोहरा
तुलसि-कानन-गन्ध-सुमङ्गला ॥

अत्राऽऽगच्छन्ति सद्भक्ता दर्शनार्थं हनूमतः।
"हनुमान्-घट्ट" नाम्ना च जानन्ति नगरे जनाः ॥

ततोऽप्युत्तरदिङ्मार्गे श्रीराधाकृष्ण-मन्दिरम् ।
तथैवाऽऽस्ते पुनस्तत्र श्रीसदाशिवमन्दिरम् ॥

मन्दिरात्प्राक् परिसरे धर्मशालाऽपि वर्तते।
महोत्सवविवाहादि - कार्येषु सुलभा सदा ॥

जन्माष्टमी-दिने यत्र कृष्ण-जन्म-महोत्सवः।
क्रियते रथयात्रा च सर्वैर्नगरवासिभिः ॥


Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अधिराज्येऽपिनान्यत्र नैतादृग्दर्शनीयता ।
श्रीकृष्णरथयात्रायाःप्रसिद्धिरिति विश्रुता ॥

पूर्वोक्ते सिङ्गियातीरे "परोपकार"संस्थया ।
समर्थितमिदं स्थानं दाह-संस्कार-कर्मणि ॥

यतः संस्थापिता संस्था परोपकारिभिर्जनैः ।
"परोपकारसंस्थे"ति तस्मात् ख्याता जनान्तिके ॥

जातस्य हि ध्रुवं मृत्युर्मनुष्यस्य भविष्यति ।
मृतस्य देहसंस्कारो विधातव्यो जलाशये ॥

इति निश्चित्य मनसा सर्वैर्नगरवासिभिः ।
निर्मितं दाहसंस्कारस्थलं श्रीसिंगियातटे ॥

शिवालयं विनिर्माय देवतानां च स्थापनम् ।
प्रतिष्ठापूर्वकं कृत्वा समुद्घाटनमप्यभूत् ॥

निवासस्थान-सौविध्यं कुशकाष्ठादि-सञ्चयः ।
यद्यदावश्यकं पितृभक्तानां तत्र लभ्यते ॥

वटाश्वत्थागस्तिविल्वरुद्राक्षैः तुलसीयुतैः ।
पुण्यवृक्षलतापुष्पोद्यानैः संशोभितं स्थलम् ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुरक्षार्थं स्थलस्यास्य सेष्टकालोहशृङ्खलैः ।
परितः परिखाः सन्ति तत्रत्य-जनरक्षिताः ॥

गिरिशृङ्गाद् विनिःसृत्य या याः समतले गताः ।
निर्मला जलधारास्ताः तीर्थरूपा न संशयः ॥
अत्र पार्थिवदेहानां संस्कारे विहिते सति ।
परलोकगता जीवा नचिरात् शान्तिमाप्नुयुः ॥

ततश्च पूर्वोत्तरराजमार्गे
श्रीपुष्पलालाऽभिधचत्वरोऽस्ति ।
तत्रापि विद्वद्वर - भूसुराणां
इतस्ततःसन्ति गृहाऽश्रमाणिं ॥

तत्रापि हरिभक्तानां गृहे पर्वणि पर्वणि ।
हरिकीर्तनमारभ्य संभवन्ति महोत्सवाः ॥

दक्षिणे नगरस्यास्य, सीमायां भारतस्य च ।
नाम्ना "जोगवनी" चाऽऽस्ते सन्ति कार्यालयाःशुभाः ॥

निर्गमागमवस्तूनां राजस्वाऽऽदानकर्मणि ।
व्यापृता उभयत्रैव सर्वकारजनाः स्थिताः ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्मिन् परिसरे तत्र दुर्गादिव्या मनोहरम् ।
मन्दिरं वर्तते सर्वे नित्यं कुर्वन्ति दर्शनम् ॥

नगरस्य क्वचित्कोणे बटाश्वत्थादिसंकुले ।
"संसारीमाई" नाम्नीयं वर्तते जगदीश्वरी ॥

ततश्च पूर्वदिग्भागे वृक्षच्छाया समन्विते ।
स्थाने च वर्तते देवी मन्दिरे वगलामुखी ॥

धरान-राजमार्गस्य निकटे श्रीशिवस्य तु ।
गरीवेश्वर-नाम्नैकं विद्यते शिवमन्दिरम् ॥

अस्यैव सविधे रम्यं सत्सङ्ग - भवनं शुभम् ।
विद्यते "साई"भक्ताश्च नित्यं कुर्वन्ति कीर्तनम् ॥

पूर्वोक्त - वटवृक्षाच्च पूर्वमार्गस्य दक्षिणे ।
लक्ष्मीनारायणस्यापि लभ्यते दिव्यमन्दिरम् ॥

ततोऽप्युत्तर-दिग्भागे,आस्ते वासुकि-मन्दिरम् ।
अभ्रं लिहं कर्तुमिच्छद्देवलोकस्य चुम्बनम् ॥

"सीतारामस्य" च तथा "राधा-कृष्णस्य" मन्दिरम् ।
जलाशयो धर्मशाला चाऽस्त्यत्र कीर्तनस्थलम् ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र वृक्षलतापुष्पपशुपक्षिवनेचरा : ।
चित्रिताश्चापि दृश्यन्ते प्रत्यक्षं जंगमाइव ॥

विराटनगरस्यास्य बहिर्दिक्षु लसन्ति ताः ।
कलाकौशलवाणिज्यकृषकाणां विशेषताः ॥

अस्मिन् "मोरङ" मण्डले कतिपय-स्थानेषु ग्रामेषु च
वर्तन्तेऽत्र विभिन्नदेवनिलया, संस्थापकाः सज्जनाः ।
न्यायोपार्जितद्रव्यदानकुशलाः केचिद् ह्यनाथालये
यत् किञ्चिद् वितरन्ति द्रव्यमपरे वृद्धाश्रमे श्रद्धया ॥

पूर्वाञ्चले प्रसिद्धास्ति अंनाथालय आश्रम ।
विपन्नाना मनाथानां शिशूनां च सहायकः ॥

उपायान्तर हीनाञ्च स्थविरास्तेच संस्थया ।
वस्त्रभोजन दानेन रक्षिताऽसन्ति सर्वत : ॥

देव मन्दिर गोशाला पुष्पपल्लव वाटिका ।
सपादशत संख्यानां निवासभवनानि च ॥

तत्संस्थाया विकाशाय सन्त्यन्थे कर्मचारिणः ।
विशेषतः सुरक्षार्थं माता सीता विशिष्यते ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इतो विराटनगरात्पूर्वस्यांतु शुभस्थले।
गिरिमूले वरीवर्ति शताशीधाम मन्दिरम्॥

पुरात्रि गोत्रवान् कश्चिद् भास्करो द्विजसत्तमः।
तपस्तप्त्वा यजन् यज्ञैरेकसम्वत्सरात्मकम्॥

निर्ममे पुण्यतीर्थेऽत्र मन्दिराणि दिवौकसाम्।
तीर्थस्थलमिदं रम्यं शोभनं भक्तसंमतम्॥

उनविंशतिपूर्वार्द्धे सप्ताशीति च वत्सरे।
संस्थापितंततो नाम सताशीधाम कथ्यते॥

कन्काई - माई - सरित उत्तरे तटवर्तिनम्।
लक्ष्मीनारायणं भक्ता प्रणमन्ति सदैव ते॥

तद्दक्षिणतटंरम्यं थानं सुरुङ्गेति निगद्यते।
तत्रापि प्राप्यते नित्यं वालगोपालदर्शनम्॥

केनचिद् योगिना तत्र कोटिहोम विधिर्यदा।
सम्पादितोऽभवच्चात्र यज्ञशालादि दर्शनम्॥

पूर्वे झापामण्डले कीचकाख्यो
रक्षोऽरण्ये भीमसेनाद्विनष्टः।
सन्ति प्रत्यङ् सुन्सरी मण्डलेऽपि
तीर्थान्यस्मिन् सप्तकोशीप्रदेशे॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतराधाम श्रीरामधुनीति विपिनस्थले ।
श्रीरामचरितान्तर्हि श्रूयतेऽत्र जनश्रुतिः ॥

"झोराहाट" "कटहरी" "सिनुवारी" "अमाहि" च ।
"वुग्डोरी" "रामगञ्जेति" स्थानानि सन्ति सर्वतः ॥

बटवृक्ष-समीपेऽत्र "गुँरास पुस्तकालयः" ।
विद्यालयश्च तत्रैव विद्यते वाचनालयः ॥

धर्मशास्त्रादि ग्रन्थानां मन्येषामपि संग्रहः ।
विद्यतेऽत्र महाविद्यालयश्चापि प्रचाल्यते ॥

बटवृक्षस्थलात् प्रत्यङ्, चाँदनी-चत्वराभिधे ।
सन्ति वैष्णवभक्तानां भवनानि समन्ततः ॥

सन्ति विद्यालयाश्चात्र पुस्तकालय इत्यपि ।
पुनश्चापण्यविस्तारो हट्टकं गुरुवासरे ॥

इत उत्तरमार्गे च जम्बूभूरुह नामके ।
स्थाने संस्थापितो भक्तैर्जामुनेश्वरशंकरः ॥

शनौ मध्यपुरे तत्र वुधे तु सिंगियातटे ।
भौमे तु शिंशपामूले भृगौ च कंञ्चनाभिधे ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीशंकरपुरे सोमे त्रिटोलाख्येऽपि पत्तने ।
क्रयविक्रयहट्टानि लगन्ति नगरान्तरे ॥

वेदोपनिषदश्चैव सेतिहासपुराणयोः ।
धर्मशास्त्रादिग्रन्थानां सन्त्यत्र पुस्तकालयाः ॥

तथैव राष्ट्रभाषायां काव्य - साहित्य-संग्रहाः ।
ग्रन्थाऽऽगाराश्च वर्तन्ते भव्याश्च वाचनालयाः ॥

वाणी-प्रकाश-प्रतिभा-पुरस्कारादिसंस्थया ।
प्रकाशिताःप्रदृश्यन्ते कविताः राष्ट्रभाषया ॥

कवयः कवयित्र्यश्च छन्दोऽलङ्कारमण्डिताम् ।
कवितां रचयन्त्यत्र कविगोष्ठी दिनेदिने ॥

विभिन्न-रस-भावज्ञाः कवयः काव्य-कोकिलाः ।
पुरस्क्रियन्ते प्रत्यब्दे प्रत्यर्तौ प्रतिपक्षके ॥

बहु विद्यालयाः सन्ति महाविद्यालयास्तथा ।
आर्याणां वैदिकानां च तथान्येषां च साम्प्रतम् ॥

आरभ्य प्रथमां कक्षां सोच्चमध्यमवर्गसु ।
पठन्ति छात्राःसर्वत्र स्वभाषाऽऽदृतमानसाः ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्नातकोत्तरमध्येतुं छात्राणां सुलभाय च।
पूर्वाञ्चले प्रसिद्धोऽस्ति महाविद्यालयो महान्॥

योगसाधनसंस्थासु, आध्यात्मिक-कलासु च ।
यतमानाःप्रदृश्यन्ते केचिच्छ्रद्धालवो जनाः ॥

गोरक्षदेशे नेपाले गावः सन्ति सहस्रशः।
विराटनगरे चापि गोशालास्ति सुशोभना॥

गोभक्ता भगवद्भक्ताः सर्वे नगरवासिनः।
धनाढ्याः बहु वर्तन्ते दातारश्च मनस्विनः॥

तादृशैर्भावुकैः सद्भिर्गवां संरक्षणाय च।
अन्यैश्चकृषकैर्दत्तैः पलालयवसादिभिः॥

तासां गवां सुरक्षा च धर्मविद्भिर्विधीयते।
गवां संचारणायात्र नियुक्ता गोपगोपिकाः॥

आधार-हीना ये केचिद् दुर्विधा दुःखभागिनः।
अथवैकान्तकामा ये विरक्ता विषयेषु च ॥

भोजनाच्छादने चिन्तामपहाय निरन्तरम्।
बृद्धाश्रमं समाश्रित्य वसन्ति स्थविरा जनाः॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेषां कृते व्यवस्थाऽत्र कृता नगरवासिभि : ।
वैदेशिकैरपि कृता व्यवस्थाः सन्ति कुत्रचित् ॥

विद्यालयादि-निर्माणे स्वास्थ्य-संरक्षणस्थले ।
न्यायोपार्जितद्रव्याणां व्ययं कुर्वन्ति सज्जनाः ॥

मातृपितृविहीना ये ह्यनाथा बालबालिकाः ।
दृश्यन्ते यत्र कुत्राऽपि ग्रामेषु नगरेषु च ॥

तेषां कृते व्यवस्थाऽत्र विहिताऽस्ति दयालुभिः ।
शिक्षा-भोजन-दानेन शिशवो रक्षिता मुहुः ॥

मठ-मन्दिर-गोष्ठीनां संस्थानानां निरीक्षणे ।
नगरस्य विकासाय दक्षा नगरपालिका ॥

पूर्वस्मिन् नगरस्यापि वहते सिंगिया सरित् ।
पश्चिमे वहते नित्यं शुद्धा केसलिया नदी ॥

गंगा-यमुनयोर्मध्ये यथा तीर्थानि भारते ।
तथैवात्राऽपि तीर्थानि देवानां मन्दिराणि च ॥

श्रुतिस्मृतिपराःसौराःशैवाःशाक्ता विनायकाः ।
वैष्णवास्तत्र परमाः श्रौताः सर्वे सनातनाः ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शैवाश्च वैष्णवा माध्वा नैम्बार्का बल्लभाश्च ते ।
चैतन्या रामानन्दीयाः पन्थानः सन्ति भूरिशः ॥

कबीरा साइरामाश्च कृष्णप्रणामिनोऽपरे ।
सतपालाश्चानुकूला स्तथा ब्रह्मकुमारिकाः ॥

सिक्खा जैनास्तथा बौद्धाः खृष्टेस्लामादिका अपि ।
स्व - स्वाऽऽचार्यविभेदेन तमेवैकमुपासते ॥

नाऽन्यःसमस्तजगतः सृष्टिकर्त्ता स्वयं हरिः ।
अल्ला-खृष्टादि-नाम्नाऽपि देवः सैक उपास्यते ॥

बौद्धानां बुद्धधर्म्माणां बाहुल्यं काष्ठमण्डपे ।
विशिष्टं लुम्बिनीक्षेत्रं यत्र जातः स्वयं प्रभुः ॥

दृश्यते हि च सर्वेषां पारस्परिक-मेलनम् ।
स्वस्व-सिद्धान्त-मार्गेण भगवन्तमुपासते ॥

विराटवासिनां पुंसां नारीणां च विशेषतः ।
दृश्यते सर्वकालेषु सौहार्दमतिशोभनम् ॥

गच्छन्तःस्मितपूर्वं ते "कुतो राधे" ब्रुवन्ति च ।
सर्वेप्यत्राऽस्तिका लोकाः नह्यनीश्वर-वादिनः ॥


Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तीर्थयात्रा - प्रसंगेन विद्वांसः सन्तसाधवः ।
आगत्य चोपदेक्ष्यन्ति प्रायः पर्वणि पर्वणि ॥

शयने गमने वार्ता प्रसंगे सुखदुःखयोः ।
भगवन्नाम जल्पन्ति विराटनगरे जनाः ॥

राजनीतिज्ञतायुक्ता : प्रधानपदभागिनः ।
प्रादुर्भूता इतश्चैव मन्त्रिणोऽन्येऽपि सत्तमाः ॥

व्यासासनमलङ्कृत्वा कथावाचनतत्पराः ।
विद्वांसो बहवश्चात्र सन्त्यस्मिन् नगरान्तरे ॥

आर्षं हिन्दुत्वमुत्कृष्टं तस्य पालनतत्पराः ।
दृश्यन्ते बहवो नार्यो नराश्च नगरान्तरे ॥

अष्टादश - पुराणेषु सर्वत्र गीयते हरिः ।
तथापीच्छन्ति सद्भक्ताः श्रोतुं भागवतीःकथाः ॥

सप्ताह-विधिना कैश्चित् चातुर्मास्य-विधानतः ।
प्रायो भागवतस्यैव विस्तार्यन्ते शुभाः कथाः ॥

द्वापरान्ते विराटस्य कारणेन समागताम् ।
शृण्वन्ति श्रीहरेर्भक्ताःश्रीमद्भागवतीं कथाम् ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विराटनृपतिर्न स्यात् नोत्तरा वा मनस्विनी ।
परीक्षिन्नैव जायेत न च भागवती कथा ॥

तस्मात् श्रद्धालवो भक्ता मन्यन्तेऽस्मत्पुरीमिमाम् ।
भगवद्धर्मसंयुक्तां श्रीमद् - भागवतान्विताम् ॥

इत्थमास्तिक्य-भावानां बाहुल्येन समन्ततः ।
राजते भ्राजते नित्यं विराटनगरी पुरी ॥

त्रिवेणी-संगमाद् वार्ता प्रारब्धा धार्मिकी मया ।
देवमन्दिर-सत्तीर्थ-शिक्षा-स्वास्थ्यादिवर्णना ॥

विराटनगरं यावद् लघ्वी संसूचनात्मिका ।
अनया संप्रसीदन्तु विबुधाश्च सुधीवराः ॥

नैतावता विराटस्य वर्णनं पूर्णतां व्रजेत् ।
अतोऽन्येषां च विदुषां दृष्टेरत्रप्रयोजनम् ॥

❐



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

# परिचय

नाम : टेकनाथ अधिकारी

जन्म : विक्रमाब्द १९७९, वैशाख शुक्ल दशमी
(वैशाख २३ गते)

जन्मस्थानम् : धनकुटा मण्डलान्तर्गत "चानुवा" ग्रामः

वर्तमान-निवासस्थलम् : विराटनगर-३, गोग्राहा, मोरङ

शिक्षा : शास्त्री (पुराण, साहित्य, वैष्णवशास्त्र
आसाम संस्कृत बोर्ड, भारत,
स्वर्णपदक - ललिता मेडल
स्नातक (नेपाली) त्रिभुवन विश्वविद्यालय

प्रकाशित कृति :

१) निवेदनमञ्जरी (खण्डकाव्य, विक्रमाब्द १९९८)

२) जीवनवृत्त (संस्मरण) विक्रमाब्द २०६०

३) अन्तर्नाद (शोककाव्य) विक्रमाब्द २०६४

४) विराटमहिमा (लघुकाव्य) विक्रमाब्द २०६६

पुरस्कार सम्मान : रामइन्दिरा दीर्घसेवा वाणी पुरस्कार २०६५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu